भावे तत्वार्थे स्त्री अटा०टाप् । ङीप् राजनि० ।

**हैमदुग्धिन्** पु० हेमवर्णं दुग्धं निर्यासोऽस्त्यस्य इनि । उडुम्बरे वृक्षे शब्दर० [शैशिरे राजनि० ४हिमे च माधवः

**हैमन्** न० हि—मनिन् । १स्वर्णे धातौ २धुस्तूरे अमरः ३नाग·

**हैमन्त** पुं न० । हि-भ सुट् च । अग्रहायणपौषमासात्मके ऋतौ कालभेदे अमरः । कपित्थे शब्दच० ।

**हैमन्तनाथ** पु० हेमन्ते नाथ्यते याच्यते नाथ—कर्मणि घञ् ।

**हैमपुष्प** न० हेमेव पीतं पुष्पमस्य । १अशोकवृक्षे २जवापुष्पे च मेदि० । ३चम्पकवृक्षे पु० कप् । तत्र वाच्ये च शब्दच०

**हैमपुष्पी** स्त्री हेमेव पीतं पुष्पमस्याः ङीप् । १मञ्जिष्ठायाम् शब्दर०। २स्वर्णजीवन्त्याम् ३इन्द्रवारुण्याम् ४सुवल्याम् ५कण्टकार्याञ्च राजनि० । संज्ञायां कन् ह्रस्वः । स्वर्ण· यूथिकायाम् स्त्री । [ (चाँपाकला) राजनि० ।

**हैमफला** स्त्री हेमेव पीतं पक्वफलमस्याः । स्वर्णकदल्याम्

**हैममालिन्** पु० हेमेव किरणानां मालास्त्यस्य इनि । १सूर्य्ये त्रि० त० । २अर्कवृक्षे च [राजनि०।

**हैमयूथिका** स्त्री हेमेव पीता यूथिका । स्वर्णयूथिकायाम्

**हैमरागिणी** स्त्री हेम्न इव रागोऽस्त्यस्याः इनि ङीप् । हरिद्रायाम त्रिका० ।

**हैमल** पु० हेम तदंशं निर्मेयस्वर्णमध्यात्, तद्वर्णं वा लाति ला-क । १कलादे स्वर्णकारे २कषपाषाणे ३शकलासे पुंस्त्री० मेदि० स्त्रियां ङीष् ।

**हैमलता** स्त्री हेमेव पीता लता । स्वर्णजीवन्त्याम् राजनि०।

**हैमवल** न० हेम्ना वलते शोभते वल-अच् । मौक्तिके राजनि० हिमवलमित्यपि पाठान्तरं तत्रार्थे हिमतुल्य· शुभ्रत्वात्तथात्वम् ।

**हैमशङ्ख** पु० हेमेव शुचिः शङ्खोऽस्य । विष्णौ त्रिका० ।

**हैमशिखा** स्त्री हेमेव पीता शिखा यस्याः । स्वर्णक्षीर्य्याम् शब्दर० । [तत्त्वे रसच० ।

**हैमसार** न० हेम सारयति निर्मलीकरोति सृ—णिच्-अण् ।

**हैमहस्तिरथ** पु० हेमनिर्मितहस्तियुक्तो रथः । तुलापुरु-षादिषोडशमहादानमध्ये दानार्थं कल्पिते १स्वर्णमय-हस्तियुक्ते हेममयरथे २तद्दाने न० । तद्विधिः हेमा०दा० "अथातः संप्रवक्ष्यामि हेमहस्तिरथं शुभम् । यस्य प्रदानाद्भवनं वैष्णवं याति मानवः । पुण्यां तिथिमथा साद्य तुलापुरुषदानवत् । विप्रवाचनकं कुर्य्याल्लोकेशावा-हनं बुधः । ऋत्विग्मण्डपसम्भारभूषणाच्छादनादि-कम् । अत्राप्युपोषितस्तद्वद् ब्राह्मणैः सह भोजनम्" । इत्याद्यादिशब्देन देशकालवृद्धिश्राद्धादिसर्वमनुक्तं मत्-स्यपुराणोक्ततुलापुरुषास्यतं वेदितव्यम् । उपोषित इति, उपवासाशक्तौ नक्तमपि वेदितव्यम् । "कुर्य्यात् पुष्प-रथाकारं काञ्चनं मणिमण्डितम् । वलभीभिर्विचित्रा-भिश्चतुश्चक्रसमन्वितम् । लोकपालाष्टकोपेतं शिवार्कब्रह्म-संयुतम् । मध्ये नारायणोपेतं लक्ष्मीपुष्टिसमन्वितम्" । पुष्परथः, क्रीडार्थो रथः, स च चतुष्काकारेणोपर्य्याच्छा-दितो भवति वलभ्यो लोकपालाश्रयाः । लोकपालब्रह्म-शिवार्कलक्षणमुक्तं ब्रह्माण्डदाने । मध्यशब्दः पूर्वापराभ्यां संबध्यते, शिवादीनामपि स्थानापेक्षायास्तेनैव निवृत्तेः । नारायणादिलक्षणं पञ्चरात्रात् "नारायणश्चतु-र्बाहुः शङ्खं चक्रं तयोत्तरे । दक्षिणे तु महापद्मं नीलजीमूतसन्निभे । वामे श्रीर्वल्लकीहस्ता पुष्टिः पद्म-करा परा" इति । "कृष्णाजिने तिलद्रोणं कृत्वा संस्थापयेद्रथम् । तथाष्टादश धान्यानि भाजनासनच-न्दनैः । दीपिकोपानहच्छत्रपादुकादर्पणान्वितम् । ध्वजे तु गरुडं कुर्य्यात् कूबराग्रे विनायकम् । नानाफल-समायुक्तं उपरिष्टाद्वितानकम् । कौशेयं पञ्चवर्णं च अम्लानकुसुमान्वितम् । चतुर्भिः कलशैः सार्द्धं गोभि-रष्टाभिरन्वितम् । चतुर्भिर्हैमभातङ्गैर्मुक्तादामविभू-षितैः । स्वरूपतः करिभ्याञ्च युक्तं कृत्वा निवेदयेत् । कुर्य्यात् पञ्चपलादूर्द्ध्वमाभारादपि शक्तितः" । ध्वजे तु गरुडं कुर्य्यादित्यादि, ध्वजो दण्डः । गरुडलक्षण-मुक्तं नारदीये "उपेन्द्रस्याग्रतः पक्षी गुडाकेशः कृताञ्जलिः । सव्यजानुनतो भूमौ कुर्य्यां च फणिम-ण्डितः । पक्षिजङ्घो नरघोणस्तुङ्गनासो नराङ्गकः । द्विबाहुः पक्षयुक्तश्च कर्त्तव्यो विनतासुतः" । अथ विना-यकस्य "चतुर्भुजस्त्रिनेत्रश्च कर्त्तव्योऽत्र गजाननः । नागयज्ञोपवीतश्च शशाङ्ककृतशेखरः । दन्तं दक्षकरे दद्या-द्द्वितीये चाक्षसूत्रकम् । तृतीये परशुं दद्याच्चतुर्थे मोदकं तथा" । उपर्य्यधोहस्तयोर्दन्तादि, देयमिति, कू-बरो व्याख्यातः । अम्लानकुसुमं, पुष्पविशेषः रूढ़ि· यौगिकमपहरतीतिन्यायात् महासहेति प्रसिद्धमेव गृह्यते । भारो व्याख्यातः । ध्वजगतदेवताश्च पञ्चपला· दिपरिमितेन रथकृतकृतसुवर्णेनैव निष्पादनीयाः एवं सम्भारानुपकल्प्य पूर्ववदधिवासनं विधाय परदिवसे पुण्याहवाचनादि सकलं कर्मकाण्डं समाप्य सर्वौषधि-जलैराचार्य्यो यजमानस्य स्नापनं कुर्य्यात् । "ततो मङ्गल